पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि।
आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः ॥
क्षणिकाः सर्व्वसंस्कारा इति या वासना
स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः ॥
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः ॥
रागादिज्ञानसन्तानवासनाच्छेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥
कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्व्वाह्णभोजनम्।
सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिः ॥”
इति ॥
इति सर्व्वदर्शनसंग्रहे बौद्धदर्शनम् ॥)
(बुद्धेरिदमिति व्युत्पत्त्या वाच्यलिङ्गः। बुद्धसम्बन्धि वस्तु ॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति। बुद्ध + अण्।) बुद्धशास्त्रावलम्बी। तत्पर्य्यायः। भिक्षकः २ क्षपणः ३ अह्रीकः ४ वैनायिकः ५। इति त्रिकाण्डशेषः ॥

बौधः, पुं, (बुधस्यापत्यं पुमान्। बुध + अण्।) बुधस्य पुत्त्रः। स च पुरूरवाः। इति हेमचन्द्रः। ३। ३६५ ॥

ब्यध, य औ ताड़े। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट।) य विध्यति शत्रुं शूरः। औ अव्यात्सीत्। कश्चित्तु द्विभूतस्यानिकारीभूतयकारस्य अधैवकारो वर्ग्यः अन्यत्र दन्त्यः इति मन्वानः सनि विव्यत्सतीत्याह। इति दुर्गादासः ॥

ब्युष, क उत्सर्जि। उत्सर्गे। (चुरा०-पर०-सक०-सेट्।) क व्योषयति धनं दाता। व्योषं त्रिकटु। इति दुर्गादासकृतधातुदीपिकायां गोविन्दभट्टः ॥

ब्रण, शब्दे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) ब्रणति। इति दुर्गादासः ॥

ब्रततिः, स्त्री, (व्रजन्ती ततिर्विस्तृतिर्यस्याः। पृषोदरादित्वात् साधुः। यद्वा, प्रतनोतीति। तनदृणविस्तारे "क्तिच् क्तौ च संज्ञायाम्।" ३। ३। १७४। इति क्तिच्। पृषोदरादित्वात् पस्य वः।) लता। विस्तारः। इत्यमरः ॥

ब्रध्नः, पुं, (बन्धबन्धने + "बन्धेर्ब्रधिबुधी च। उणा० ३। ५। इति नक् ब्रधादेशश्च।) सूर्य्यः। (यथा, ऋग्वेदे। १। ६। १।
"युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः।
रोचन्ते रोचना दिवि ॥")
तृणमूलम्। अर्कवृक्षः। इत्यमरः। २। ४। १५।
शिवः। इति हेमचन्द्रः ॥ मेदिनीकारेणाप्यस्य वकारादौ लिखितोऽयं शब्दः ॥ (दिनम्। अश्वः। इति निघण्टुः ॥ चतुर्द्दशमनोर्भौत्यस्य पुत्त्रभेदः। यथा, मार्कण्डेये। १००। ३२।
"गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ॥")
रोगविशेषः। तस्य लक्षणं यथा,
"अभ्यभिष्यन्दिगुर्व्वामसेवनान्निचयं गतः।
करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्द्दिशेत् ॥"
इति माधवकरः ॥
तस्य चिकित्सा।
"भृष्टैरेरण्डतैलेन सम्यक् कल्कोऽभयाभवः।
कृष्णासैन्धवसंयुक्तो ब्रध्नरोगहरः परः ॥
अजाजीहपुषाकुष्ठं गोमेदबदरान्वितम्।
काञ्जिकेन तु संपिष्टं तल्लेपो ब्रध्नजित् परः ॥"
गोमेदं पत्रम्। तथा च निघण्टौ धन्वन्तरिः।
"पत्रं दलाह्वयं रामं गोमेदं रसनाह्वयम् ॥"
इति भावप्रकाशः ॥
(अस्य सम्प्राप्तिलक्षणं यथा,—
"यस्य वायुः प्रकुपितः शोफशूलकरश्चरन्।
वंक्षणाद्वृषणौ याति ब्रध्नस्तस्योपजायते ॥"
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये ॥)

ब्रह्म, क्ली, (बृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः। बृहिवृद्धौ + "बृंहेर्नोऽच्च।" उणा० ४। १४५। मनिन् नकारस्याकारः। रत्वञ्च।) वेदः। (यथाह श्रुतिः।
"तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते ॥"
तथा च भागवते। १। १। १।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः
स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्
सूरयः ॥")
वेदान्तमते 'वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजड़समूहोऽवस्तु।' 'ब्रह्मैव नित्यं वस्तु तदन्यदखिलमनित्यम्।' तथाहि,—
"यस्मादर्व्वाक् संवत्सरोऽहोभिः परिवर्त्तते।"
तदेव ज्योतिषां ज्योतिः। नित्यं विभुं सर्व्वगतं सुसूक्ष्मम्। आकाशवत् सर्व्वगतश्च नित्यः। अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातिर्दातुः परायणं यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति। तथा, नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत्। आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेति नेह नानास्ति किञ्चन यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्त्यम्।" इत्यादि श्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्वं भेदप्रपञ्चेऽनित्यत्वञ्च तस्यैव पुंसः प्रतिभाति। तथानुमानमपि यथा, विमतोऽचेतनवर्गोऽनित्यो विभक्तत्वात् घटपटस्तम्भादिवत् इति। अनेन हि विभक्तस्यानित्यत्वेऽवगते तस्मिन्ननुगतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमपि अर्थादवगच्छति। इति वेदान्तसारे विद्वन्मनोरञ्जनीटीका ॥ तत्र श्रुतिवाक्यानि यथा, "सत्यं ज्ञानमनन्तं ब्रह्म। विज्ञानमानन्दं ब्रह्म।" "आनन्दो ब्रह्मेति व्यजानात् आनन्दरूपममृतं यद् विभाति, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तत् विजिज्ञासस्व तद्ब्रह्मेति।" इत्याद्यसंख्येयं श्रुतिवचनमनुसन्धेयम् ॥")
तत्त्वम्। तपः। इत्यमरः। ३। ३। ११४ ॥
ब्रह्म चतुर्व्विधं यथा। विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४। इति वेदान्तसारः ॥
अस्य लक्षणम्। यथा, आत्मबोधे।
"यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥
तिर्य्यगूर्द्ध्वमधःपूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते द्वयम्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥"
अपि च। "सत्यमानन्दमद्वयमनन्तमेकरूपं वाङ्मनसोऽगोचरं सर्व्वगं सर्व्वातीतं चिदेकरसं देशकालापरिच्छिन्नमपादमपि शीघ्रगममपाणि च सर्व्वग्रहमचक्षुरपि सर्व्वद्रष्टृ अश्रोत्रमपि सर्व्वश्रोतृ अचिन्त्यमपि सर्व्वज्ञं सर्व्वनियन्तृ सर्व्वशक्ति सर्व्वेषां सृष्टिस्थितिलयकर्त्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति ॥" शुद्धबुद्धस्वभाव इत्यौपनिषदाः। १। आदिविद्वान् सिद्ध इति कापिलाः। २। क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः। ३। लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः। ४। शिव इति शैवाः। ५। पुरुषोत्तम इति वैष्णवाः। ६। पितामह इति पौराणिकाः। ७। यज्ञपुरुष इति याज्ञिकाः। ८। सर्व्वज्ञ इति सौगताः। ९। निरावरण इति दिगम्बराः। १०। उपास्यत्वेन देशित इति मीमांसकाः। ११। लोकव्यवहारसिद्ध इति चार्व्वाकाः। १२। यावदुक्तोपपन्न इति नैयायिकाः। १३। विश्वकर्म्मेति शिल्पिनः। १४। इति कुसुमाञ्जलिवृत्तिः ॥ योगशास्त्रमते।
"ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं रसः।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥
इति महाभारते मोक्षधर्म्मः ॥